इतः, त्रि, (इ + क्त ।) गतः । स्मृतः । इति मेदिनी ॥ (प्राप्तः । ज्ञाने, क्ली ।)

इतः, [स्] व्य, (अस्मादिति निपातनात् सिद्धम् ।) नियमः । पञ्चम्यर्थः । (यथा कुमारे २ । २८ । "तद्ब्रूत वत्साः किमितः प्रार्थयध्वं समागताः" ।) विभागः । इति विश्वः ॥

इतरः, त्रि, (इना कामेन तरतीति । इ + तॄ + अच् यद्वा इतेन ज्ञानेन त्रीयते इति बाहुलकात् अरः ।) अन्यः ("वामेतरस्तस्य करः प्रहर्त्तुः" । इति रघुः । २।३१ ।) नीचः । इत्यमरः ॥

इतरविशेषः, पुं, (इतरस्मात् विशेषः ।) अन्यप्रभेदः ॥

इतरेतरं, त्रि, अन्योऽन्यं । परस्परं । इति हेमचन्द्रः ॥ यथा, रघुः । ७ । ५४ ।)

("व्यूढावुभौ तावितरेतरस्मात्
भङ्गं जयञ्चापतुरव्यवस्थम्" ।)

इतरेद्युः, [स्] व्य, (इतर + एद्युस् ।) इतरस्मिन्नहनि । अन्यदिने । इत्यमरः ॥

इतस्ततः, व्य, अत्र तत्र । एखाने सेखाने इति भाषा । यथा,—

"द्वे सहस्रे रथानां स गजानामयुतं रणे ।
इतस्ततो धावमानः सुरथो रथिनां वरः" ॥

इति जैमिनिभारते आश्वमेधिके पर्व्वणि २० अध्यायः ॥ अपि च ।

"ताडितास्तेन वीरेण पक्षीन्द्राश्वासमागताः ।
इतस्ततस्ते तन्मुक्ता गताः पातालमुल्वणाः" ॥

इति पाद्मे पातालखण्डे ४४ अध्यायः ॥

इति, व्य, (इण् + क्तिच् ।) हेतुः । (यथा, रघुः ।२।२२।

"वत्सोत्सुकापि स्तिमिता सपर्य्यां,
प्रत्यग्रहीत्सेति ननन्दतुस्तौ" ।)

प्रकरणम् । (यथा, मनुः । २ । १५ ॥

"उदितेऽनुदिते चैव समयाध्युषिते तथा ।
सर्व्वथा वर्त्तते यज्ञ इतीयं वैदिकी श्रुतिः" ॥)

प्रकाशः । (यथा, रघुः । १ । १२ ।

"दिलीप इति राजेन्दुरिन्दुः क्षीरनिधाविव" ॥)

आदिः । समाप्तिः । इत्यमरः ॥ निदर्शनम् । ("आपो नारा इति प्रोक्ता आपो वै नरसूनवः" । इति मनुः । १।१० ।) प्रकारः । अनुकर्षः । परक्षतिः । इति मेदिनी ॥ (विवक्षानियमः । प्रत्यक्षं । अवधारणं । परामर्शः । मानम् । इत्यमर्थः । स्वरूपार्थः । "गुणानित्येव तान् विद्धि" । इति रामायणे । १म काण्डे ।)

इतिकथं, त्रि, (इति इत्थं प्रकारेण कथा यस्य ।) अश्रद्धेयं । नष्टं । इति मेदिनी ॥

इतिकथा, स्त्री, अर्थशून्यवाक्यं । इति मेदिनी ॥

इतिह, व्य, (इति एवं च ह किल च ।) पारम्पर्य्योपदेशः । तत्पर्य्यायः । ऐतिह्यं २ । इत्यमरः ॥

इतिहासः, पुं, (इतिह आस्तेऽस्मिन् । इतिह + आस + घञ् ।) पूर्व्ववृत्तान्तः । प्राचीनकथा । तत्पर्य्यायः । पुरावृत्तः २ । इत्यमरः ॥ (यथा, मनुः । ३ । २३२ ।

"आख्यानानीतिहासांश्च पुराणानि खिलानि च" ।)

व्यासादिप्रणीतभारतादिग्रन्थः । इति भरतः ॥

इत्कटः, पुं, (इतं समीपस्थं जनं कटति आच्छादयति फलेन इति । इत् + कट् + अच ।) वृक्षविशेषः । घोकड़ा इति भाषा । तत्पर्य्यायः । वज्रमूलः २ वाटीदीर्घः ३ खरच्छदः ४ । इति रत्नमाला ॥ ("वीरणशालिषष्टिकेक्षुबालिकादर्भकुशकाशगुन्द्रेत्कटकत्तृणमूलानीति दशेमानि स्तन्यजननानि भवन्ति" । इति चरकः ॥)

इत्किला, स्त्री, रोचनाख्यगन्धद्रव्यम् । इति शब्दचन्द्रिका ॥

इत्थं, व्य, (इदम् + थमु । एतेतौरथोरिति इदादेशः ।) इदंप्रकारं । इति वोपदेवः ॥ एइ प्रकार इतिभाषा । (यथा रघौ । २ । २५ ।

"इत्थं व्रतं धारयतः प्रजार्थं
समं महिष्या महनीयकीर्त्तेः ।)

इत्यः, त्रि, (इ + क्यप् ।) गम्यः । इति व्याकरणम् ॥

इत्वरः, त्रि, (एतीति + इ + क्वरप् ।) क्रूरकर्म्मा । पथिकः । दुर्व्विधः । नीचः । इति हेमचन्द्रः ॥

इत्वरी, स्त्री, (एति परपुरुषं प्राप्नोतीति । इ + क्वरप् + ङीष् ।) असती । इत्यमरो मेदिनी च ॥ अभिसारिका । इति हेमचन्द्रः ॥

इद, इ, परमैश्वर्य्ये । (इदित् भ्वादि-परं-सकं-सेट् ।) इति कविकल्पद्रुमः ॥ इ इन्दते इन्दति इन्द्रः । इति दुर्गादासः ॥

इदं, [म्] त्रि, (एति, इण् गतौ, इणो दमुगिदि दमादीदर्त्तिः । यद्वा इन्दति, इदि परमैश्वर्य्ये, इन्देः कमिर्नलोपश्चेति दीक्षितः ।) पुरोवर्त्तिवाचकसर्व्वनाम । इति व्याकरणम् ॥ एइ इति भाषा ।

इदंकार्य्या, स्त्री, (इदम् कार्य्यं यस्याः ।) दुरालभावृक्षः । इति शब्दचन्द्रिका ॥

इदा, स्त्री, संवत्सरादिवर्षपञ्चकान्तर्गततृतीयवत्सरः । इति मलमासतत्त्वं ॥ अस्या विवरणम् वत्सरशब्दे द्रष्टव्यम् ॥

इदानीं, [न्] व्य, (इदम् + दानीं, इदम इश् ।) अस्मिन् काले । सम्प्रति । इत्यमरः ॥ ("हविषे दीर्घसत्त्रस्य सा चेदानीं प्रचेतसः" । इति रघुः । १ । ८० ।) वाक्यभूषणम् । इति शब्दरत्नावली ॥

इदानीन्तनं, त्रि, (इदानीं + भवार्थे ट्युः ।) इदानीम्भवं । सम्प्रतिजातं । आधुनिकं । इति व्याकरणम् ॥ "वासना चेदानीन्तनी प्राक्तनी च रसास्वादहेतुः" । इति साहित्यदर्पणे ३ परिच्छेदे ।२६।)

इदावत्सरः, पुं, (इदा इति वत्सरः ।) संवत्सरादिपञ्चान्तर्गतवत्सरविशेषः । अस्मिन् वत्सरे अन्नवस्त्रदानं महाफलम् । इति विष्णुधर्म्मोत्तरम् ॥ ("संवत्सरोऽसि परिवत्सरोऽसीदावत्सरोसीद्वत्सरोऽसि" । इति वाजसनेयीसंहिता ।२७।४५।)

इद्धं, क्ली, (इन्द + क्तः ।) आतपः । दीप्तिः । इति मेदिनी ॥ आश्चर्य्यं । इति जटाधरः ॥

इद्धः, त्रि, निर्म्मलः । इति शब्दरत्नावली ॥

इद्वत्सरः, पुं, इदावत्सरः । यथा,—

"संवत्सरस्तु प्रथमो द्वितीयः परिवत्सरः ।
इद्वत्सरस्तृतीयस्तु चतुर्थस्त्वनुवत्सरः ॥
पञ्चमो वत्सरस्तेषां तदेभिः पञ्चभिर्युगं ।
तेषु संवत्सरो ह्यग्निः सूर्य्यस्तु परिवत्सरः ॥
सोम इद्वत्सरस्तेषां वायुश्चैवानुवत्सरः ।
रुद्रस्तु वत्सरो ज्ञेयः पञ्चाब्दा ये युगात्मकाः" ॥

इति देवीपुराणे कालव्यवस्थानामाध्यायः ॥

इध्मं, क्ली, (इन्ध + मक् ।) अग्निसन्दीपनकाष्ठम् । इत्यमरः ॥ जालानि काठ इति भाषा । ("तत्रेध्मानयने शुक्रो नियुक्तः काश्यपेन ह" । इति भारते ।)

इनः, पुं, (एतीति । इ + नक् ।) सूर्य्यः । प्रभुः । ("वस्व इनस्पतिः" । ऋग्वेदे । ४३ । २ ।) नृपभेदः । इत्युणादिकोषः ॥

इनानी, स्त्री, वटपत्रीवृक्षः । इति राजनिर्घण्टः ॥

इन्दम्बरं, क्ली, (इन्दं महार्हम् अम्बरं नीलवस्त्रमिव ।) इन्दीवरं । नीलोत्पलं । इति शब्दमाला ॥

इन्दिन्दिरः, पुं, भ्रमरः । इति हेमचन्द्रः ॥

इन्दिरा, स्त्री, (इन्द + किरच + टाप् ।) लक्ष्मीः । इति जटाधरः त्रिकाण्डशेषश्च ॥ ("मन्दं मन्दं मन्दिरादिन्दिरेव" इति भामिनीविलासे ।) शोभा । कान्तिः । यथा, "निशि निःसरदिन्दिरं कथं तुलयामः कलयापि पङ्कजम्" । इति भामिनीविलासे ।)

इन्दिरामन्दिरं, क्ली, (इन्दिरायाः मन्दिरं वासस्थानमिव ।) विष्णुः । इति राजवल्लभः ॥

इन्दिरालयं, क्ली, (इन्दिरायाः लक्ष्म्याः आलयः ।) पद्मं । इति शब्दरत्नावली । क्लीवत्वमभिधानात् ॥

इन्दिरावरं, क्ली, (इन्दिरायाः लक्ष्म्याः वरं प्रियं ।) नीलोत्पलं । इति शब्दरत्नावली ॥

इन्दिवरं, क्ली, (इन्दतीति । इदि परमैश्वर्य्ये, इगुपधात् किदिति इन् । इन्दिर्लक्ष्मीस्तस्याः वरं प्रियं ।) नीलोत्पलं । इति शब्दमाला ॥

इन्दीवरं, क्ली, (इन्दी लक्ष्मीस्तस्याः वरं प्रियं ।) नीलपद्मं । तत्पर्य्यायः । नीलाम्बुजन्म २ । इत्यमरः । कुवलयं ३ नीलाब्जं ४ नीलोत्पलं ५ । इति रत्नमाला ॥ ("इन्दीवरेण नयनं मुखमम्बुजेन" । इति कालिदासः । "इन्दीवरश्यामतनुर्नृपोऽसौ" । इति रघुः ।६।६५।) (नीलोत्पलशब्देऽस्य गुणादयो ज्ञेयाः ।)

इन्दीवरिणी, स्त्री, (इन्दीवर + इनि ङीष् ।) उत्पलिनी । इति राजनिर्घण्टः ॥ (नीलोत्पलसमूहः ।)

इन्दीवरी, स्त्री, (इन्दीवरमस्त्यस्याः । अर्श आद्यच् गौरादित्वात् ङीष् ।) शतमूली । इति मेदिनीराजनिर्घण्टौ ॥

("वासानिम्बपटोलकेतकिबलाकुष्माण्डकेन्दीवरी" इति परिभाषायां ।)

इन्दीवारं, क्ली, (इन्द्या लक्ष्म्या वारो वरणं यस्मिन् ।) इन्दीवरं । इत्यमरटीकायां रायमुकुटः ॥

इन्दुः, पुं, (उनत्ति अमृतधारया भुवं क्लिन्नां करोति इति । उन्द + उ + आदेरिच्च ।) चन्द्रः । ("दिलीप इति राजेन्दुरिन्दुः क्षीरनिधाविव" । इति रघुः ।१ ।१२।) कर्पूरः । इत्यमरः ॥ (चन्द्रसमसंख्यः एकसंख्यायुक्तः । मृगशिरानक्षत्रम् ॥ "दिवार्ककरधर्षितं स्पृष्टमिन्दुकरैर्निशि" ।